Total Pages—8

# UG/II/SANS/H/III/18(New)

## 2018

## SANSKRIT

## [ Honours ]

## PAPER – III

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

1. "वाणोच्छिष्टं जगत् सर्व्वम्" — व्याख्यायताम् । 10

*अथवा*

महाश्वेतायाः सौन्दर्यवर्णनं पाठ्यांशमवलम्ब्योपस्थाप्यताम् ।

**2.** संस्कृतभाषया देवनागरलिप्या च एकं व्याख्येयम्— 6

(क) पञ्चमहाभूतमयमपहाय द्रव्यात्मकम् अङ्गनिष्पादनोपकरण-कलापं धवलगुणेनेव केवलेनोत्पादिताम्, दक्षाध्वरक्रिया-मिवोद्भूतगणकचगअह भयोपसेवितत्र्यम्बकाम् ।

(ख) आलोकमात्रेणैवापगतश्रमो दृष्ट्वा मनस्येवमकरोत्, अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणमेतदालोकयतः सरः सफलतामुपगतम् ।

**3.** सरलसंस्कृतेन देवनागरलिप्या च प्रश्नचतुष्टयं समाधेयम्— 1 × 4

(*a*) महाश्वेताया वीणा कीदृशी आसीत् ?

(*b*) कानि तावत् पञ्च महाभूतानि ?

(*c*) यौवनं कदा कथम् आगतम् ?

(*d*) गङ्गया सह का तुल्या कथं वा ?

(*e*) चन्द्रापीडः कन्यकां कुत्र ददर्श ?

(*f*) "त्रिपुरारिशरशलाकामिव" — 'त्रिपुरारि'- इति शब्दस्य कोऽर्थः ?

4. रघुवंशमनुसृत्य रघूणामन्वय: कविना कथमुपस्थापित इत्यालोच्यताम् । 10

*अथवा*

सस्त्रीकस्य दिलीपस्य वशिष्ठाश्रमगमनं समासेनोपस्थाप्यताम् ।

5. संस्कृतभाषया देवनागरलिप्या च <u>एको</u> व्याख्येय: — 6

मन्द: कवियश:प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामन: ।।

*अथवा*

आकारसदृशप्रज्ञ: प्रज्ञया सदृशागम: ।
आगमै: सदृशारम्भ आरम्भसदृशोदय: ।।

6. अधोलिखितेषु प्रश्न<u>चतुष्टयं</u> सुरगिरा देवनागर्य्या लिप्या च समाधेयम् — 1×4

(*a*) रघुवंशस्य मङ्गलश्लोके कौ स्तूयेते ?

(*b*) "मोहादुडुपेनास्मि सागरम्" — अत्र 'उडुपेन' इत्यस्य कोऽर्थ: ?

(*c*) 'व्यूढोरस्कः' — इत्यस्यार्थः प्रदीयताम् ।

(*d*) "द्वयमेवार्थसाधनम्" — अत्र द्वयमित्यतेन कयोर्ग्रहणम् ?

(*e*) 'स्वाहयेव हविर्भूजम्" — इत्यत्र 'स्वाहया'-इति पदेन का सूच्यते ?

(*f*) दिलीपः कथं प्रकाशश्चाप्रकाशश्चेति ?

**7.** उदाहरणसहयोगेन भारवेः रचनाकौशलमालोच्यताम् । 10

*अथवा*

किरातार्जुनीयस्य प्रथमसर्गमनुसृत्य युधिष्ठिरं प्रति वनेचरस्य वचनमुद्धृतिपुरः सरमुपस्थाप्यताम् ।

**8.** अधोलिखितेषु एकः सरलसुरगिरा देवनागर्य्या लिप्या च व्याख्येयः — 7

क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥

*अथवा*

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥

9. सरलसंस्कृतेन देवनागरलिप्या च पञ्चानाम् उत्तरं लिखत— 1 × 5

(*a*) 'किरातार्जुनीयम्'— इति महाकाव्यस्य प्रथमसर्गस्य किं नाम ?

(*b*) युधिष्ठिरो वनेचरं किमर्थम् अयुङ्क्त ?

(*c*) 'किरातार्जुनीयम्'—इति महाकाव्ये कति सर्गाः ?

(*d*) महात्मभिः समं विरोधः कथं वरम् ?

(*e*) 'वर्णिलिङ्गी'—इति पदस्य कोऽर्थः ?

(*f*) कः किंसखा ?

(*g*) "उदाजहार द्रुपदात्मजा गिरः"—अत्र द्रुपदात्मजा' इत्यनेन का सूच्यते ?

**10.** (*a*) एकस्य सव्यासवाक्यं समासरूपं निर्णय — 1 × 1

नताननः, वनेचरः ।

(*b*) कस्यचिदेकस्य विभक्तिः निरूपणीया — 1 × 1

(*i*) वरं विरोधोऽपि समं महात्मभिः

(*ii*) हितान्न यः संशृणुते स किम्प्रभुः ।

(*c*) एकस्य व्युत्पत्तिः निरूपणीया — 1 × 1

वञ्चनीयाः, विशङ्कमानः ।

**11.** "माघे सन्ति त्रयो गुणाः" — व्याख्यायताम् । 10

*अथवा*

"शिशुपालवधम्' — इति महाकाव्यस्य प्रथमसर्गमनुसृत्य शिशुपालस्य पूर्वजन्मद्वयवृत्तान्तो यथा वर्णितः तत्समासेनोपस्थाप्यताम् ।

**12.** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गम् एकः व्याख्येयः — 7

नवानधोऽधो बृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ।।

*अथवा*

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारुचमूरचर्म्मणा
कुथेन नागेन्द्रमिवेन्द्र-वाहनम् ।।

13. सरलसुरगिरा देवनागर्य्या लिप्या च पञ्च प्रश्ना: समाधेया: — $1 \times 5$

(*a*) नारदस्य उपवीतं कीदृशमासीत् ?

(*b*) 'शिशुपालवधम्' — इति महाकाव्यस्य उत्स: क: ?

(*c*) महानुभावा: कस्मिन् विषये अर्थिनो भवन्ति ?

(*d*) प्रजासृजा क: श्रुतीनाम् अक्षयो गुरु: निधि: कृत: ?

(*e*) 'उपेन्द्र' — इति पदेन क: सूच्यते ?

(*f*) 'प्रसिद्धमूर्ध्वज्वलनं हविर्भुज:'' — हविर्भूज इति पदस्य कोऽर्थ: ?

(*g*) रावण: कथं जानकीं न मुमोच ?

14. (*a*) एकस्य व्यासवाक्येन सह समासरूपं लिखत — $1 \times 1$

विभाविताकृतिम्, विपाकपिङ्गा: ।

(*b*) कस्यचिदेकस्य व्युत्पत्तिः निरूपणीया— $1 \times 1$

दधानम्, विरेजिरे ।

(*c*) एकेनाव्ययेन वाक्यं विरचय— $1 \times 1$

इव, एव ।

---